श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ पञ्चनवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चनवतितमः सर्गः ॥

## स्वीयां शुद्धिं समर्थयितुं सीता शपथं करोत्विति श्रीरामस्य विचारः

रामो बहून्यहान्येव तद् गीतं परमं शुभम्।
शुश्राव मुनिभिः सार्धं पार्थिवैः सह वानरैः॥ **7.95.1** ॥

तस्मिन् गीते तु विज्ञाय सीतापुत्रौ कुशीलवौ।
तस्याः परिषदो मध्ये रामो वचनमब्रवीत्॥ **7.95.2** ॥

दूताञ्शुद्धसमाचारानाहूयात्ममनीषया।
मद् वचो ब्रूत गच्छध्वमितो भगवतोऽन्तिके॥ **7.95.3** ॥

यदि शुद्धसमाचारा यदि वा वीतकल्मषा।
करोत्विहात्मनः शुद्धिमनुमान्य महामुनिम्॥ **7.95.4** ॥

छन्दं मुनेश्च विज्ञाय सीतायाश्च मनोगतम्।
प्रत्ययं दातुकामायास्ततः शंसत मे लघु॥ **7.95.5** ॥

श्वः प्रभाते तु शपथं मैथिली जनकात्मजा।
करोतु परिषन्मध्ये शोधनार्थं ममैव च॥ **7.95.6** ॥

श्रुत्वा तु राघवस्यैतद् वचः परममद्भुतम्।
दूताः सम्प्रययुर्बाढं यत्र वै मुनिपुङ्गवः॥ **7.95.7** ॥

ते प्रणम्य महात्मानं ज्वलन्तममितप्रभम्।
ऊचुस्ते रामवाक्यानि मृदूनि मधुराणि च॥ **7.95.8** ॥

तेषां तद् भाषितं श्रुत्वा रामस्य च मनोगतम्।
विज्ञाय सुमहातेजा मुनिर्वाक्यमथाब्रवीत्॥ **7.95.9** ॥

एवं भवतु भद्रं वो यथा वदति राघवः।
तथा करिष्यते सीता दैवतं हि पतिः स्त्रियाः॥ **7.95.10** ॥

तथोक्ता मुनिना सर्वे राजदूता महौजसम्।
प्रत्येत्य राघवं सर्वं मुनिवाक्यं बभाषिरे॥ **7.95.11** ॥

ततः प्रहृष्टः काकुत्स्थः श्रुत्वा वाक्यं महात्मनः।
ऋषींस्तत्र समेतांश्च राज्ञश्चैवाभ्यभाषत॥ **7.95.12** ॥

भगवन्तः सशिष्या वै सानुगाश्च नराधिपाः।
पश्यन्तु सीताशपथं यश्चैवान्योऽपि काङ्क्षते॥ **7.95.13** ॥

तस्य तद् वचनं श्रुत्वा राघवस्य महात्मनः।
सर्वेषामृषिमुख्यानां साधुवादो महानभूत्॥ **7.95.14** ॥

राजानश्च महात्मानं प्रशंसन्ति स्म राघवम्।
उपपन्नं नरश्रेष्ठ त्वय्येव भुवि नान्यतः॥ **7.95.15** ॥

एवं विनिश्चयं कृत्वा श्वोभूत इति राघवः।
विसर्जयामास तदा सर्वांस्ताञ्छत्रुसूदनः॥ **7.95.16** ॥

इति सम्प्रविचार्य राजसिंहः श्वोभूते शपथस्य निश्चयं वै।
विससर्ज मुनीन् नृपांश्च सर्वान् स महात्मा महतो महानुभावः॥ **7.95.17** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चनवतितमः सर्गः॥